Roll No. .........................

Total No. of Pages : 3

Total No. of Questions : 6

पूर्वमध्यमा द्वितीयखण्ड

**विषय कोड : 619**

## दर्शनम्

## षष्ठम्-प्रश्नपत्रम्

**समय : 3 घण्टे** **पूर्णांक : 100**

निर्देशः–सर्वे प्रश्नाः समाधेयाः।

1. यथोचितं विकल्पं लिखतु – 5×2=10

(*i*) अनुमानम् अस्ति –

(क) पञ्चविधम् (ख) चतुर्विधम्

(ग) त्रिविधं (घ) द्विविधं

(*ii*) लिङ्गं अस्ति –

(क) द्विविधं (ख) त्रिविधं

(ग) पञ्चविधं (घ) चतुर्विधं

(*iii*) हेत्वाभासाः सन्ति –

(क) पञ्चविधः (ख) सप्तविधः

(ग) अष्टविधः (घ) नवविधः

(*iv*) अयथार्थानुभवः अस्ति –

(क) त्रिविधः (ख) चतुर्विधः

(ग) पञ्चविधः (घ) षड्विधः



1011

(v) संस्काराः सन्ति –

(क) षड्विधः (ख) पञ्चविधः

(ग) त्रिविधः (घ) द्विविधः

2. रिक्तस्थानानि पूरयतु – 5×2=10

(i) ..........................अनुमानम्।

(ii) व्याप्ति विशिष्ट..........................ज्ञानं परामर्शः।

(iii) पर्वतो..........................इति प्रतिज्ञा।

(iv) निश्चित साध्याऽभाववान्..................................।

(v) साध्याऽभाव..................................हेतुरविरुद्धः।

3. यथायोग्यं योजयत – 5×3=15

| | | | |
|---|---|---|---|
| (i) | परामर्शजन्यम्ज्ञानम् | – | अनैकान्तिकः |
| (ii) | साहचर्य नियमः | – | पक्षः |
| (iii) | व्याप्यस्य पर्वतादि वृत्तित्वम् | – | अनुमितिः |
| (iv) | सन्दिग्ध साध्यावान् | – | व्याप्तिः |
| (v) | सत्यभिचारो | – | पक्षधर्मता |

4. सत्य कथनानां समक्षे 'सत्यं' असत्य कथनानां समक्षे 'असत्यं' लिखतु – 5×3=15

(i) अन्वयमात्र व्याप्तिकं केवलव्यतिरेकि।

(ii) साध्याभाव व्याप्तो हेतुर्विरुद्धः।

(iii) आप्तस्तु यथार्थवक्ता।

(iv) शक्तं ज्ञानम्।

(v) अर्थाबाधो योग्यता।



1012

5. लघूत्तरीया: प्रश्ना: – 5×4=20

(*i*) परार्थानुमानं किम् ?

(*ii*) सपक्ष: क: ?

(*iii*) सत्प्रतिपक्षं किम् ?

(*iv*) का आकांक्षा ?

(*v*) किं दु:खम् ?

6. दीर्घउत्तरीया: प्रश्ना:। 3×10=30

(*i*) अन्वय व्यतिरेकि लक्षणं सपदकृत्यं लिखतु।

(*ii*) आश्रया सिद्धं सपदकृत्यं निरुपणीयम्।

(*iii*) तर्कस्य लक्षणं सपकृत्यं लिखतु।



1013

प्राश्निक कोड क्र. 2/19.18

पृष्ठ क्र.- 01

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय दर्शनम् विषय कोड 619 माध्यम संस्कृतम्

कुल प्रश्न 06

समय - 3 घण्टा पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उत्तर 01 | यथोचितं विकल्पं लिखत ।<br>(i) "घ" द्विविधं (ii) "ख" त्रिविधं (iii) "क" पञ्चविधः<br>(iv) "क" त्रिविधः (v) "ग" त्रिविधः | |
| उत्तर 02 | रिक्तस्थानानि पूरयत<br>(i) अनुमिति करणं (ii) पक्षधर्मता (iii) वह्निमान्<br>(iv) विपक्षः (v) व्याप्ति | |
| उत्तर 03 | यथायोग्यं योजयत<br>(i) अनुमितिः (ii) व्याप्तिः (iii) पक्षधर्मता<br>(iv) पक्षः (v) अनैकान्तिकः | |
| उत्तर 04 | सत्य कथनानां समक्षे "सत्यं" असत्य कथनानां समक्षे "असत्यं" लिखत<br>(i) असत्य (ii) सत्य (iii) सत्य (iv) असत्य<br>(v) सत्य | |
| उत्तर 05 | लघूत्तरीयाः प्रश्नाः<br>(i) यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत् परार्थानुमानम्। यथा- पर्वतो वह्निमान्, धूमत्वात्, यो यो धूमवान् स स वह्निमान्, यथा- महानसम्, तथा चायम् तस्मात्तथेति। अनेन प्रतिपादितलिङ्गात्परोऽप्यग्निं प्रतिपद्यते। | |

हस्ताक्षर [signature]

1014

प्राश्निक कोड क्रं............

पृष्ठ क्र.- 02

प्रश्न/पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय.............................................विषय कोड.......................................माध्यम.............................

कुल प्रश्न.......................................

समय - 3 घण्टा

पूर्णांक..................

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | (ii) निश्चितसाध्यवान् सपक्षः। यथा- तत्रैव महानसम्। | |
| | (iii) यस्य साध्याऽभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वात्, शब्दत्ववत्। शब्दोऽनित्यः कार्यत्वाद् घटवत्। | |
| | (iv) पदस्य पदान्तर व्यतिरेक प्रयुक्ताऽन्वयाऽन्वयाऽननुभावकत्वमाकाङ्क्षा। | |
| | (v) सर्वेषाम् प्रतिकूल वेदनीयं दुःखम्। | |
| 06 | दीर्घ उत्तरीयाः प्रश्नाः | |
| | उत्तरम् (i) लक्षणं ⇒ अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि; यथा- वह्नौ साध्ये धूमवत्त्वम्। 'यत्र धूमस्तत्राऽग्निर्यथा- महानसम्' इत्यन्वयव्याप्तिः। 'यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति; यथा- ह्राद' इति व्यतिरेक व्याप्तिः। | |
| | पदकृत्यं → अन्वयव्यतिरेकिणो लक्षणमाह- अन्वयेनेति। तृतीयायाः प्रयोज्यत्वम् इत्यर्थः। साध्यसाधनयोः साहचर्यमन्वयः तदभावयोः साहचर्यं व्यतिरेकः। तथा चाऽन्वयप्रयोज्य व्याप्तिमद् व्यतिरेक प्रयोज्य व्याप्तिमद् अन्वय व्यतिरेकीत्यर्थः। केवल व्यतिरेकिण्यति व्याप्ति वारणाय अन्वयेनेति। केवलाऽन्व- | |

हस्ताक्षर........

1015

प्राश्निक कोड क्र. 21918

पृष्ठ क्र.- 03
प्रश्न/पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय दर्शनम् विषय कोड 619 माध्यम संस्कृतम्

कुल प्रश्न 06

समय – 3 घण्टा पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | यिनि व्यभिचारवारणाय व्यतिरेकेणेति । तथा च अन्वयव्याप्तिरूपदर्शितैव । व्यतिरेकव्याप्तिश्च साध्याऽभावव्यापकीभूताऽभाव प्रतियोगित्वम् इत्यर्थः तदुक्तं -<br>व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते ।<br>तयोरभावयोस्तस्माद्विपरीतः प्रतीयते ॥<br>अन्वयः साधनं व्याप्यं साध्यं व्यापकमिष्यते ।<br>साध्याऽभावोऽन्यथा व्याप्यो व्यापकः साधनाऽत्ययः ॥<br>(ii) लक्षणं ⇒ आश्रयासिद्धो यथा- गगनाऽरविन्दं सुरभि, अरविन्दत्वात् सरोजाऽरविन्दवत् । अत्र, गगनाऽरविन्दमाश्रयः स च नाऽस्त्येव ।<br>पदकृत्यं → आश्रयाऽसिद्ध इति । आश्रयासिद्धत्वं च पक्षताऽवच्छेदकाऽभाववत्पक्षकत्वम् । भवति हि अरविन्दत्वे गगनीयत्वरूपपक्षतावच्छेदकाऽभाववत्पक्षकत्वम् अरविन्द रूपपक्षे गगनीयत्वविरहात् । ननु कथमरविन्दे गगनीयत्वविरहोऽत आह - अत्रेति । उपदर्शिताऽनुमान इत्यर्थः ।<br>(iii) लक्षणं ⇒ व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा- 'यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यात्' इति ।<br>पदकृत्यं → व्याप्येति । असम्भववारणाय व्याप्यारोपेणेति । पुनरसम्भव वारणाय व्यापकारोप इति । अत्र वह्न्यभावो व्याप्यः, धूमाभावो | |

हस्ताक्षर

प्राश्निक कोड क्रं. 2 | 1918

पृष्ठ क्र.- 04

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय दर्शनम् विषय कोड 619 माध्यम संस्कृतम्

कुल प्रश्न 06

समय - 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | व्यापकः । यद्यपि तर्कस्य विपर्ययात्मकत्वेन पृथग्विभागोऽनुचितः, तथापि प्रमाणानुग्राहकत्वात्स उदित इति बोध्यम् । स्वप्नस्तु पुरीतद्बहिर्देशान्तरदेशयोः सन्ध्याविडानाड्यां वा मनसि स्थितेऽदृष्टविशेषेण धातुदोषेण वा जन्यते, स च मानसविपर्ययान्तर्भूतः । | |

परीक्षितम्

हस्ताक्षर